শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ব্রহ্মদের কৃতা

॥ শ্রী রামনস্তুতিঃ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী ৱামনস্তুতিঃ ॥

জযাধীশ জযাজেয জয ৱিশ্ৱগুরো হরে।
জন্মমৃত্যুজরাতীত জযানন্ত জযাচ্যুত॥ **1**॥

জযাজিত জযাশেষ জযাৱ্যক্তস্থিতে জয।
পরমার্থার্থ সর্ৱজ্ঞ জ্ঞানজ্ঞেযার্থনিঃসৃত॥ **2**॥

জযাশেষ জগৎসাক্ষিঞ্জগৎকর্ত্তুর্জগদ্গুরো।
জগতোঽজগদন্তেশ স্থিতৌ পালযতে জয॥ **3**॥

জযাখিল জযাশেষ জয সর্ৱহৃদিস্থিত।
জযাদিমধ্যান্তময সর্ৱজ্ঞানমযোত্তম॥ **4**॥

মুমুক্ষুভিরনির্দ্দেশ্য নিত্যহৃষ্ট জযেশ্ৱর।
যোগিভির্মুক্তিকামৈস্তু দমাদিগুণভূষণ॥ **5**॥

জযাতিসূক্ষ্ম দুর্জ্ঞেয জয স্থূল জগন্ময।
জয সূক্ষ্মাতিসূক্ষ্ম ৎৱং জযানিন্দ্রিয সেন্দ্রিয॥ **6**॥

জয স্বমাযাযোগস্থ শেষভোগ জযাক্ষর।
জযৈকদংষ্ট্রপ্রান্তেন সমুদ্ধৃতৱসুন্ধর॥ **7**॥

নৃকেসরিন্ সুরারাতিৱক্ষঃস্থলৱিদারণ।
সাম্প্রতং জয ৱিশ্ৱাত্মন্ মাযাৱামন কেশৱ॥ **8**॥

নিজমাযাপরিচ্ছিন্ন জগদ্ঘাতর্জনার্দন।
জযাচিন্ত্য জযানেকস্বরূপৈকৱিধ প্রভো॥ **9**॥

ৱর্দ্ধস্ব ৱর্ধিতানেকৱিকারপ্রকৃতে হরে।
ৎৱয্যেষা জগতামীশে সংস্থিতা ধর্মপদ্ধতিঃ॥ **10**॥

ন ৎৱামহং ন চেশানো নেন্দ্রাদ্যাস্ত্রিদশা হরে।
জ্ঞাতুমীশা ন মুনযঃ সনকাদ্যা নে যোগিনঃ॥ **11**॥

ৎৱং মাযাপটসংৱীতো জগত্যত্র জগৎপতে।
কস্ত্বাং ৱেৎস্যতি সর্ৱেশ ৎৱৎপ্রসাদং ৱিনা নরঃ॥ **12**॥

ৎৱমেৱারাধিতো যস্য প্রসাদসুমুখঃ প্রভো।
স এৱ কেৱলং দেৱং ৱেত্তি নেতরো জনঃ॥ **13**॥

তদীশ্ৱরেশ্ৱরেশান ৱিভো ৱর্দ্ধস্ব ভাৱন।
প্রভৱাযাস্য ৱিশ্ৱস্য ৱিশ্ৱাত্মন্ পৃথুলোচন॥ **14**॥

॥ শ্রী ৱামনস্তুতিঃ সমাপ্তা॥